International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(3): 427-430
© 2017 IJSR
www.anantaajournal.com
Received: 07-03-2017
Accepted: 12-04-2017

**श्रीदिव्येन्दु-रायः**
सहकारी अध्यापकः, राणीबाँध सर्वकारीय-महाविद्यालयः, पश्चिम बंगाल, भारत

**Correspondence**
**श्रीदिव्येन्दु-रायः**
सहकारी अध्यापकः, राणीबाँध सर्वकारीय-महाविद्यालयः, पश्चिम बंगाल, भारत

# वेदमन्त्रेषु कथितमानवतावादस्य अधुना उपयोगः

**श्रीदिव्येन्दु-रायः**

## प्रस्तवना

मानवशब्दात् तल्प्रत्ययेन मानवतेति पदं निष्पद्यते । तल्प्रत्ययः स्वीयधर्मबोधनार्थं प्रयुक्तो भवति । अतो मानवतेत्यनेन साधरणतया मानवानां धर्माः गुणाः वा बोध्यन्ते । ये धर्मास्तान् न केवलं मनुष्येतरजीवेभ्यः किञ्च दुर्जनमानवेभ्योऽपि पृथकीकुर्वन्ति । ते धर्माः हि धृतिः क्षमा श्रद्धा दानमुदारता सत्यवादिता विद्वेषहीनत्वमचौर्यं शास्त्रज्ञानमात्मज्ञानं दमः क्रोधहीनत्वं विवेकबोधश्चेत्यादयः । एतेषां मानवताबोधकधर्माणामुल्लेखो मनुप्रणीते मनुसंहितेति ग्रन्थे स्पष्टतया परिलक्ष्यते । तत्र तेनोक्तम् –

धृति क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् [1] ।। इति ।

गीतायामपि भगवता श्रीकृष्णेन एतेषां धर्माणामुल्लेखः कृतः । तत्र तेन एते धर्माः मानवसम्पद्रूपेण वर्णिताः । उक्तञ्च तेन –

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च साध्यायस्तप आर्जवम् ।।
अहिंसा सत्यमक्रोधस्त्याग शान्तिरपैशुन्यम् ।
दया भूतेष्वलोलुत्वं मार्दवं ह्रीरचापलम् ।।
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति सम्पदं दैवीमभिजातस्य भारत[2] ।। इति ।

वेदः खलु अखिलधर्मस्य प्रतिभूस्वरूपो मूलरूपश्च । उक्तञ्च भगवता मनुना - वेदोऽखिलधर्ममूलमिति[3] । अतः एते श्रद्धादयो मानवतासूचकाः धर्मास्तत्रापि वैदिकैः ऋषिभिः बहुसूक्तेषु बहुधा प्रतिपादिताः । वैदिकमानवतावादस्य साम्यवादस्य वा मूलं हि मनसः साम्यम् । तदा ऋषयः सत्यमिदमनुभूतवन्तो यद् समाजे साम्यप्रतिष्ठार्थमादौ गृहेषु शान्तिसाम्यादीनां स्थापनमावश्यकम् । यस्य साम्यस्य प्रतिष्ठा परस्परं प्रति प्रेमभावेनानुगत्यप्रदर्शनेन विद्वेषवर्जितमधुरभाषणेन सानन्दरूपस्नेहबन्धनेन च सम्भवति । ऋषिनये अस्याकृत्रिममनसाम्यस्य वास्तविकरूपं हि एकान्नवर्तित्वम् । विषयोऽयमृषिकण्ठे– अरिच्छन्दः विजित्य मित्रच्छन्दो भवनमित्यादिवचनैः वारं वारं समुद्घोषितो भवति समग्रे

वैदिकसाहित्ये । परन्तु स्वल्पपरिसरयुक्ते शोधप्रबन्धे समेषां मानवतासूचकानां वैदिकमन्त्राणां विषयवर्णनमसम्भवमेव । अतो मदीयेऽस्मिन् शोधप्रबन्धे केवलमृग्वेदीयो संज्ञानसूक्ते[4] श्रद्धासूक्ते[5] यजुर्वेदीये शिवसंकल्पसूक्ते[6] अथर्ववेदीये सांमनस्यसूक्ते[7] सर्वप्रियसूक्ते[8] च प्रतिपादितायाः मानवतायाः मानवतावादस्य वा विश्लेषणात्मकमालोचनं तथा वर्तमाने तस्य उपयोगवर्णनात्मकं स्वीयमतमेव वर्तते ।

ऋग्वेदो दशमण्डलात्मकः । तत्र मण्डलेषु सूक्तानां सज्जीकरणे वैदिकर्षयः सुनिर्दिष्टायाः कस्याश्चित् पद्धत्याः अनुसरणं कर्तुमिच्छन्ति । अतः कदापि कश्चन विशेषदेवस्य माहात्म्यकीर्तनं कदापि प्रसिद्धानामृषीणामुपलब्धं ज्ञानवर्णनं कदापि च साधारणदेवत्त्वमुपरि परमैक्यस्य तपश्चेत्यादयो मन्त्रेषु विन्यस्ताः भावनाः एव तान् विषयेऽस्मिन् प्रोत्साहितान् कृतवत्यः इति मन्ये । अनेन ज्ञायते वेदेऽस्मिन् वैचित्रपूर्णानि बहूनि सूक्तानि सन्ति । तेष्वन्यतमं हि संज्ञानसूक्तम् । सूक्तस्यास्य द्रष्टा संवननः । सर्वेषामेकत्रावस्थानमैकमत्यञ्च यस्य कण्ठे समुद्घोषितं तस्य संवननः इति सम्बोधनं यथार्थमेव । सूक्तस्यास्य देवतापि तदनुरूपैव । कारणं सूक्तेऽस्य ऐकमत्यस्य भावनया भावितः सन् एकं लक्ष्यं प्रति गन्तव्यमिति ज्ञानमेव संज्ञानरूपेण वर्णितम् । संज्ञानपदस्यार्थः सम्यक् ज्ञानम् । मन्त्रचतुष्टयसम्पन्नं सूक्तमिदमाकारेण यद्यपि क्षुद्रं तथापि भावगौरवेण विशेषतता समृद्धं भारतीयैतिह्यस्य मर्मवाणीस्वरूपञ्च । तत्रर्षिः संवननः विश्वमानवानां कृते उदाररूपामेकां मिलनभूमिं सृजनार्थं सर्वेषामाह्वानं करोति । सृष्टिकर्तुः श्रेष्ठः सष्टिः हि मनुष्यः । परन्तु मानवेषु विबिधविषयमाश्रित्यानन्तो विरोधो वर्तते । विभेदोऽयं तान् परस्परं विच्छिन्नान् श्रेयोबोधतो विच्युतान् च करोति । येन मानवजातेः विनाशमार्गः प्रशस्तो भवति । अतोऽनेन सूक्तेन ऋषिः संवननः मानवान् ऐक्यमन्त्रेण सञ्जीवितकर्तुमिच्छति । एतदर्थं स वदति यूयं सर्वे मिलित्वा गच्छथ परस्परं प्रति विरोधपरित्यागपूर्वकं सममनस्काः भूत्वा समानवाक्यं वदथ च । युस्माकं चित्तवृत्तिरपि समाना मतविरोधवर्जिता भवत्विति[9] । किञ्च युष्माकं मनो विचारज्ञानञ्च यथा समरूपमेकस्मन्नेवार्थे पर्यवसितञ्च भवतु तदर्थं स समानमन्त्रेण युष्मान् दीक्षितान् करोति । अस्यार्थस्तु अन्तःकरणं ज्ञानं संस्कारश्चेति समानमेकरूपं भवतु । न केवलं तत् शोभनसम्मेलनार्थं युष्माकं संकल्पः एकविधो हृदयाणि समानरूपाणि च भवन्त्विति प्रार्थयति । दृश्यते हि–

समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति[10] ।। इति ।

ऋषिसंवननकण्ठे ध्वनितं मानवतावादस्य गीतमिदं न केवलं वैदिके काले परन्तु विभेददीर्णस्य भोगसर्वस्वस्वरूपस्याधुनिकसमाजस्यापिमर्मवाणीस्वरूपमेव ।

वैदिकसूक्तेषु मानवमनसो विभिन्नाः भावाः स्पष्टतया प्रतिरादिताः । तत्र मनसः सूक्ष्मा भावाः तेषां परिणामाः कथं तेषां भावानां वर्धनं दृढीकरणञ्च सम्भवति दृढीकरणे केऽन्तरायाश्चत्यादयो विषयाः ऋषिभिः वर्णिताः । श्रद्धा तादृश एको मनोभावो मानवतायाः एको विशेषो गुणश्च । लोके सामान्यतो जनो यत्परो भवति तत्र तस्य श्रद्धा वर्तते इति वक्तुं शक्यते । किञ्च कार्ये प्रेरको विश्वासो हि श्रद्धेत्यपि वक्तुं शक्यते । अर्थात् तथा विश्वासो यो विश्वासिनं जनं विश्वासानुगुणं क्कार्ये प्रेरयति । भाष्यकारशङ्कराचार्यमते आस्तिक्यबुद्धिरेव श्रद्धा । श्रद्धायाः माहात्म्यं गीतायामपि गीतं –

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान्भजते यो मा स मे युक्ततमो मतः[11] ।। इति ।

एवं बहुत्र बहुधा श्रद्धायाः स्तुतिः परिलक्ष्यते । तेष्वन्यतमं हि ऋग्वेदीयं श्रद्धासूक्तम् । तत्र ऋषिका कामयनी श्रद्धां देवतारूपेण स्तुतवती । श्रद्धाशब्दस्य कस्मिंश्चित् कार्यविशेषे वचनविशेषे वा स्वान्तःकरणेनादरातिशयस्य प्रकटीकरणरूपार्थोऽत्र गृहीतः । वस्तुतः श्रद्धया सम्पादितं कर्म एवाभिष्टफलदायकं तथा श्रद्धाविहीनं कर्म अनिष्टहेतुभूतं वर्जनीयञ्चेति मुख्यरूपेणात्र वर्णितम्[12] । ऋषिवर्णितेयं श्रद्धा ज्ञानाग्नेः समिन्धनस्वरूपा । अतोऽस्याः श्रद्धायाः उपासना न केवलं मनुष्यैः देवैरपि स्वीयाभिष्टसम्पादनार्थं क्रियते स्म । श्रद्धया धनप्राप्तिर्भवतीत्यपि तत्र दृश्यते[13] । अत्र वसुपदेन अज्ञानविनाशपूर्वकमरत्वप्राप्तिरेव बोध्यते । अतो मानवतायाः प्रधानं साधनमियं श्रद्धेति वक्तुं शक्यते ।

यजुर्वेदो मूलतो यज्ञक्रियासमन्वितः । परन्तु तत्रापि मानवतागुणोपेतानि सूक्तानि परिलक्ष्यन्ते । तेष्वन्यतमं हि शिवसंकल्पसूक्तम् । तत्र ऋषिकविना मनसः संकल्पः केन प्रकारेण शिवं मङ्गलमयं कर्तुं शक्यतेऽस्माभिस्तद्वर्ण्यते । मनसः स्वरूपमतिविचित्रम् । मनसैव श्रोत्रादीन्द्रियानि स्वकर्मसु प्रवृत्तानि । धीमन्तो मानवाः मनसः शुभसंकल्पेनानुप्राणिताः सन्तः महत्कर्माणि साधयन्ति । अतो मनः प्रज्ञानस्वरूपम् । मनः एव धैर्यस्वरूपम्[14] । यतो मनसि धैर्योत्पत्तिर्भवति । अस्माकं प्रतिष्ठायाः मूलं खलु मनसः स्वास्थं स्फूर्तिश्च । अनेन ज्ञायते यद् मनो हि मानवानां सर्वविधप्रवृत्तीनां नियन्त्रकम् । विषयोऽयमृषिणा दृष्टान्तेनैकेन सुन्दररूपेण प्रतिपादितः । सुसारथिः यथा प्रगहेण सुष्ठुतयाश्वानां नियन्त्रनेन सम्यकतया रथपरिचालनं करोति तथैव शिवरूपया मनसा नियन्त्रतो मानवोऽपि स्वीयोपयुक्तेषु सर्वेषां हितविधायकेषु शोभनकर्मसु प्रवृत्तो भवति। दृश्यते हि –

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयते भीशुभिर्वाजिन इव ।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु[15] ।। इति ।

अतो मनसः संकल्पो यदि शान्तो मङ्गलमयः सर्वेषां हितसाधको वा भवति तर्हि मानवेषु मानवतायाः जागरणं तथा समाजे विभेददूरीकरणं शान्तिस्थापनञ्च सम्भवति । सत्यमिदमृषिणा याज्ञवल्क्येनानुभूतं तस्मादेव सः मनसः संकल्पः यथा शिवः कल्यानकारी मङ्गलमयो वा भवत्विति प्रार्थयति । एतादृशं मनः खलु मानवानामभ्यन्तरे प्रज्ज्वलितायाः मानवतायाः प्रकाशकज्योतिस्वरूपः । अतः सुप्राचीने वैदिककाले ऋषिहृदये मानवतावादो जागरितः आसीदिति दृश्यते । तेषां मनोगगने प्रकाशितायाः अस्याः मानवतायाः धारणायाः जागरणं वर्तमानसमये मानवमनसि अत्यावश्यकमिति वक्तुं शक्यते ।
वैदिकसाम्यवादस्यास्यैको यथार्थो प्रतीकस्वरूपः खलु ऋग्वेदस्य संज्ञानसूक्तस्य ऋषिः संवननः । यः सर्वान् वनेन स्नेहेन प्रेम्ना वाबद्धान् करोति । यतः सः परमदेवतां सत्यञ्च केवलं प्रेमस्वरूपमिति ज्ञातवान् । इदं प्रेमरूपमैक्यमेव चरमज्ञानं सम्यक् ज्ञानं संज्ञानं सर्वान् एकरूपेण ज्ञानम् वा । अस्य संज्ञानस्य वाणीवाहकस्तथा मानवतायाः मूर्तिस्वरूपो ह्यथर्ववेदस्य सांमनस्यसूक्तस्य द्रष्टा ऋषिः अथर्वा । सांमनस्यपदेन मनसः ऐक्यमित्यर्थो निर्धारितः सायणपादैः। तत्र सः ऋषिः सर्वेषां हृदयस्य मनसश्चैक्यं तथा विद्वेषहीनत्वं प्रार्थयति । येन सर्वे समानहृदयसम्पन्नाः समचित्तवृत्तियुक्ताः सन्तः परस्परं प्रति सम्प्रीतियुक्तं समानज्ञानहेतुभूतं सख्यं वा स्थापयितुं समर्थाः भवन्ति[16] । समाजे शान्तिसमानताविधानार्थं गृहे शान्तिसाम्ययोः विधानमावश्यकम् । तत्र शान्तपूर्णगृहस्य रमणीयः एको दृष्टान्तः ऋषिकविना प्रदर्शितः । ऋषिवर्णिते तस्मिन् गृहे पुत्रः जननीजनकयोरनुगामी तथानुकुलकर्मा माता सन्तानान् प्रति समानमनस्का जाया मधुरवचनसम्पन्ना च । किञ्च भ्राता भ्रातरं स्वसारञ्च प्रति पुनः स्वसा भ्रातरं स्वसारञ्च प्रति विद्वेषभावं तत्र मा करोति । दृश्यते हि –

अनुव्रतः पितुः पुत्रो माता भवतु संमनाः ।
जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम् ।। इति।
मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा ।
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया[17] ।। इति च ।

अपि च सर्वे ज्येष्ठकनिष्ठभावेन परस्परं श्रद्धादीकं प्रदर्शयन्तः समानचित्तयुक्ताः समानकार्याः समानकार्योद्वहनाः एककार्यकरणे प्रवर्तमानाश्च सन्तः तत्र निवसन्ति । इत्थं तदा समाजस्य प्रत्येकगृहेषु सर्वे मानवाः परस्परं शोभनं प्रियवाक्यं वदन्तोऽवियुक्ताश्च सन्तः निवसन्ति । ऋषिवचनाद् ज्ञायते यत्तदा मानवानां जलपानस्थानमन्नभागग्रहणञ्च एकत्रमेकविधम्वासीत्[18] । किञ्च तेषां कामनापि समरूपासीत् । अथर्ववेदस्य सर्वप्रियसूक्तेऽपि लोकैषणया मानवतायाः परिचयः प्राप्यते । एकमन्त्रविशिष्टेऽस्मिन् सूक्ते ऋषिकविः देवतातः शूद्रपर्यन्तं सर्वेषां समीपे प्रियो ग्रहणयोग्यो यथा भवितुमर्हति तदर्थं प्रार्थयतीच्छप्रकाशञ्च करोति[19] । शान्तिसूक्ते तु दृश्यते यत् सर्वेषु लोकेषु मङ्गलविधायकानि शान्तिस्वरूपाणि ऋषिविदितानि यानि कर्माणि सन्ति तान्यस्माकं मङ्गलं हितञ्च सम्पादयत्विति तस्य कामना । अनेन वर्णनेनैव तदा समाजे कीदृशो मानवतावादः प्रचलितः आसीत्तस्य प्रमाणमस्मत्सविधे प्रतिभातो प्रकाशितश्च भवति ।
उपरिप्रदत्तवर्णनातः ज्ञायते यत् मानवचरित्रः खलु बहुजनानां हितस्य सुखस्य च कारणम् । तादृशस्य चरित्रस्य गठनार्थमृषिकथितं स्वार्थशून्यत्वं परार्थपरत्वञ्चेति गुणद्वयमेव मुख्यतयापेक्षितम् । अतः ऋषिघोषिता मानवतावादस्येयं वाणी मानवचरित्रनिर्मानास्य मूलकारणम् । परिशेषे वक्तुं शक्यते यद् – विभेदपूर्णस्य भोगसर्वस्वस्य वर्तमानसमाजस्यास्योत्तरणाय मानवतावादस्य सहस्रवर्षपूर्वकथितं मर्मवचनमधुनापि प्रासङ्गिकम् । अतो वैदिकसूक्तेषु प्रदर्शिता मानवतायाः ऋषिप्रोक्तेयं धारणा वर्तमानसमाजे शान्तिश्थापनार्थं स्याम्यानयनार्थञ्च सर्वेषु मानवहृदयेषु जागरणीया । इत्यलं विस्तरेण ।

**अन्त्यटीका:**

1. मनुसंहिता २.६
2. श्रीमद्भगवद्गीता १६.१-३
3. मनुसंहिता ६.९२
4. ऋग्वेदः १०.१९१.
5. ऋग्वेदः १०.१५१.
6. शुक्लयजुर्वेदः ६४
7. अथर्ववेदः ३.३०
8. अथर्ववेदः १९.६२
9. ऋग्वेदः १०.१९१.२
10. ऋग्वेदः १०.१९१.४
11. श्रीमद्भगवद्गीता ६.४७
12. ऋग्वेदः १०.१५१.१
13. ऋग्वेदः १०.१५१.४
14. शुक्लयजुर्वेदः ६४.३
15. शुक्लयजुर्वेदः ६४.६
16. अथर्ववेदः ३.३०.१
17. अथर्ववेदः ३.३०.२,३
18. अथर्ववेदः ३.३०.६
19. अथर्ववेदः १९.६२.१

**सहायकग्रन्थपञ्जिका**


1. सातवलेकर (1940), ऋग्वेदसंहिता सायणभाष्यसहित, पारडि ।
2. सातवलेकर (1946), यजुर्वेदसंहिता सायणभाष्यसहित, पारडि ।
3. शंकर पण्डित (1898), अथर्ववेदसंहिता सायणभाष्यसहित, बम्बइ ।
4. द्विवेदी कपिलदेव (2010), वैदिक साहित्य एवं संस्कृति, विश्वविद्यालय प्रकाशन, वाराणसी ।
5. ধর্মপাল গৌরী (২০০৩), পুরোনোতুন বেদের কবিতা, ঋতম্, কলকাতা।
6. বিশ্বাস দীধিতি (২০১৩), বৈদিক পাঠসঞ্চয়ন, পশ্চিমবঙ্গ রাজ্য পুস্তক পর্ষদ্, কলকাতা।
7. বন্দোপাধ্যায় শান্তি (২০০৪), বৈদিক পাঠসংকলন, সদেশ, কলকাতা।
8. ভট্টাচার্য ভবানীপ্রসাদ, অধিকারী তারকনাথ (২০১৭), বৈদিক সংকলন দ্বিতীয় খণ্ড, সংস্কৃত বুক ডিপো, কলকাতা।
9. স্বামী জগদীশ্বরানন্দ, স্বামী জগদানন্দ (১৯৬১), শ্রীমদ্ভগবদ্গীতা, উদ্বোধন কার্যালয়, কলকাতা।
10. বন্দোপাধ্যায় সুরেশচন্দ্র (২০১৫), মনুসংহিতা, আনন্দ পাবলিশার্স, কলকাতা।